| Roll No. | | | | | | | | | | | | Serial No. of Q. C. A. B. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 + 25 = 75 ] [ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 16

Total No. of Questions : 50 + 25 = 75 ] [ Total No. of Printed Pages : 16

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** **ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 16-S** **Subject : First Language — SANSKRIT**

**प्रथम भाषा संस्कृतम्**

ದಿನಾಂಕ : 08. 06. 2009 ] [ Date : 08. 06. 2009

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.

ಪರಮಾವಧಿ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

**FOR OFFICE USE ONLY**

**PART – A**

| Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks |
|---|---|---|---|---|---|---|---|---|---|---|---|
| 1. | | 10. | | 19. | | 28. | | 37. | | 46. | |
| 2. | | 11. | | 20. | | 29. | | 38. | | 47. | |
| 3. | | 12. | | 21. | | 30. | | 39. | | 48. | |
| 4. | | 13. | | 22. | | 31. | | 40. | | 49. | |
| 5. | | 14. | | 23. | | 32. | | 41. | | 50. | |
| 6. | | 15. | | 24. | | 33. | | 42. | | ∞ | |
| 7. | | 16. | | 25. | | 34. | | 43. | | ∞ | |
| 8. | | 17. | | 26. | | 35. | | 44. | | ∞ | |
| 9. | | 18. | | 27. | | 36. | | 45. | | ∞ | |

*Total Marks of Part – A*

**PART – B**

| Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks |
|---|---|---|---|---|---|---|---|---|---|
| 51. | | 56. | | 61. | | 66. | | 71. | |
| 52. | | 57. | | 62. | | 67. | | 72. | |
| 53. | | 58. | | 63. | | 68. | | 73. | |
| 54. | | 59. | | 64. | | 69. | | 74. | |
| 55. | | 60. | | 65. | | 70. | | 75. | |

*Total Marks of Part – B*

| Total Marks in words | | Grand Total | |
|---|---|---|---|

| | | | |
|---|---|---|---|
| 1. ✓ | | ✓ | ✓ |
| 2. ✓ | | | |
| *Signature of Evaluators* | *Registration No.* | *Signature of the Deputy Chief* | *Signature of the Room Invigilator* |

[ Turn over

**सामान्य निर्देश :**

i) प्रश्नयुक्तउत्तरपुस्तिकायां **Part - A** एवं **Part - B** इति द्वौ विभागौ स्तः ।

ii) **Part - A** विभागे पंचाशत् ( 50 ) एवं **Part - B** विभागे पंचविंशतिः ( 25 ) प्रश्नाः सन्ति ।

iii) प्रश्नयुक्तउत्तरपुस्तिकायां उत्तरार्थं पर्याप्तं स्थानं निर्धारितमस्ति ।

iv) **Part - A** विभागस्य प्रत्येकस्य प्रश्नस्यापि चत्वारि विकल्पानि दत्तानि । तेषु उचितम् उत्तरम् चित्वा निर्दिष्टेषु स्थानेषु लेख्यम् ।

v) **Part - B** विभागे उत्तरार्थं पर्याप्त स्थानानि दत्तानि । प्रश्नस्य उचितम् उत्तरम् निर्दिष्टेषु स्थानेषु लेख्यम् ।

## PART - A

प्रत्येके प्रश्ने चत्वारि अपूर्णानि विकल्पानि सन्ति । समुचितं विकल्पं निर्धारित स्थाने क्रमाक्षरेण सह लेख्यम् ।

50 ∞ 1 = 50

1. कठोपनिषदि बुद्धिः एवं रूपेण वर्णिता —

(A) रथिरूपेण (B) रथरूपेण

(C) सारथिरूपेण (D) प्रग्रहरूपेण ।

उत्तर : ______________________

2. मन्दमतिः पाणिनिः अत्र तपस्तप्त्वा महाज्ञानी बभूव —

(A) विन्ध्यपर्वते (B) नागपर्वते

(C) कैलासपर्वते (D) मेरुपर्वते ।

उत्तर : ______________________

3. तच्च, सद्गुणः, तन्मयः, गुरुरपि–एतेषु समूहेतरपदम् इदं भवति —

(A) तच्च (B) सद्गुणः

(C) तन्मयः (D) गुरुरपि ।

उत्तर : ______________________

4. ग्रन्थालयस्य उद्घाटनात् पूर्वमेव एषः द्वारि तिष्ठति स्म —

(A) अम्बेड्करमहोदयः (B) विश्वेश्वरय्यमहोदयः

(C) गान्धीमहोदयः (D) पाल्बुक्महोदयः ।

उत्तर : ______________________

5. एषः नरः अध्वनः पारमाप्नोति —

(A) चतुरः (B) धीमान्

(C) ज्ञानी (D) मनः प्रग्रहवान् ।

उत्तर : ______________________

6. द्वयोः क्रिययोः समानकर्तृकत्वे पूर्वतनक्रियावाचकान् धातोः एषः प्रत्ययः भवति —

(A) तुमुन् (B) क्त्वा

(C) क्तवतु (D) ल्यप् ।

उत्तर : ______________________

7. काव्यारम्भे गङ्गादेवी एनं कविं स्मरति —

(A) माघम्
(B) कालिदासम्
(C) भारविम्
(D) श्रीहर्षम् ।

उत्तर : ______________________

8. 'उपवृक्षम्'-अस्य समासस्य उदाहरणं भवति —

(A) अव्ययीभावस्य
(B) तत्पुरुषस्य
(C) द्वन्द्वस्य
(D) बहुव्रीहेः ।

उत्तर : ______________________

9. सुपवनः अत्र वाति —

(A) काश्मीरेषु
(B) मलयस्थाने
(C) राजस्थाने
(D) केरलेषु ।

उत्तर : ______________________

10. एतदर्थं जनैः हरिणः हन्यते —

(A) मांसार्थम्
(B) विषाणार्थम्
(C) चर्मार्थम्
(D) नेत्रार्थम् ।

उत्तर : ______________________

11. 'नमः' इति अव्यययोगे तत्सम्बद्धपदस्य विभक्तिः एषा भवति —

(A) प्रथमा
(B) द्वितीया
(C) तृतीया
(D) चतुर्थी ।

उत्तर : ______________________

12. काव्येषु एतत् रम्यम् —

(A) गद्यम्
(B) पद्यम्
(C) चम्पू
(D) नाटकम् ।

उत्तर : ______________________

13. विक्रमभूपालः नानादेशान्परिभ्रम्य अत्र अगमत् —

(A) पद्मालयम्
(B) अवन्तीम्
(C) उज्जयिनीम्
(D) काशीम् ।

उत्तर : ______________________

14. 'जगाम' — अत्र एषः लकारः वर्तते

(A) लट्
(B) लिट्
(C) लङ्
(D) लृट् ।

उत्तर : ______

15. शान्तिम् एतेन विन्दति —

(A) योगेन
(B) ज्ञानेन
(C) तपसा
(D) धनेन ।

उत्तर : ______

16. मरीचेः पिता एषः —

(A) ब्रह्मा
(B) विष्णुः
(C) इन्द्रः
(D) महेश्वरः ।

उत्तर : ______

17. कौन्तेयः – एच् प्रत्ययः, धैर्यम् — अत्र एषः प्रत्ययः भवति —

(A) त्वप्रत्ययः
(B) तल्प्रत्ययः
(C) अण्प्रत्ययः
(D) ष्यञ्प्रत्ययः ।

उत्तर : ______

18. हृदयामृतम्, न्यायशतकम्, समुद्यता, कृतीनां लेखकः एषः —

(A) जि० महाबलेश्वरभट्टः
(B) हेच्० वि० नागराजराव्
(C) राजशेखरः
(D) वेदान्तदेशिकः ।

उत्तर : ______

19. यः इदं सेवते सः कदापि न व्यथते —

(A) क्षीरम्
(B) दधि
(C) तक्रम्
(D) घृतम् ।

उत्तर : ______

20. अत्र एतत् शुद्धं वाक्यं भवति —

(A) नगरस्य अभितः ग्रामाः सन्ति
(B) नगरेण अभितः ग्रामाः सन्ति
(C) नगरम् अभितः ग्रामाः सन्ति
(D) नगरात् अभितः ग्रामाः सन्ति ।

उत्तर : ______

21. 'नीतिशास्त्राखिन्नबुद्धिः' राजा एषः —

(A) चन्द्रापीडः (B) विक्रमादित्यः

(C) भोजभूपालः (D) तारापीडः ।

उत्तर : ____________

22. यत्र, तत्र, कुत्र, तथा – एतेषु समूहेतरपदम् इदम् वर्तते —

(A) यत्र (B) तत्र

(C) कुत्र (D) तथा ।

उत्तर : ____________

23. कौत्सः एतस्य शिष्यः —

(A) वरतन्तोः (B) बादरायणस्य

(C) वसिष्ठस्य (D) त्रिकालनाथस्य ।

उत्तर : ____________

24. धन्वन्तरिः — वैद्यः ; अमरसिंहः —

(A) कविः (B) कोषकारः

(C) वैय्याकरणः (D) मन्त्रशास्त्रज्ञः ।

उत्तर : ____________

25. 'सप्त' इति सङ्ख्यावाचकस्य स्त्रीलिङ्गे क्रमवाचकरूपं इदम् भवति —

(A) सप्ता (B) सप्तमः

(C) सप्तमी (D) सप्तमम् ।

उत्तर : ____________

26. एषः राधाकृष्णन्महोदयस्य मार्गदर्शकः आसीत् —

(A) हेगल् (B) होग्

(C) प्लेटो (D) प्लुटिनस् ।

उत्तर : ____________

27. 'खलः' शब्दस्य विरुद्धार्थकपदम् इदम् भवति —

(A) दुष्टः (B) दुर्जनः

(C) साधुः (D) मूर्खः ।

उत्तर : ____________

28. 'मिहिर:' इति शब्दस्य अर्थ: एष: —

(A) रवि:
(B) नक्षत्रम्
(C) चन्द्र:
(D) भूमि: ।

उत्तर : ____________________

29. ह्रस्व अकारात् परं विसर्ग: तत: परं अकार: मृदुव्यञ्जनं वा भवेच्चेत् विसर्गस्य स्थाने एष: आदेश: भवति —

(A) सकार:
(B) उकार:
(C) रेफ:
(D) लोप: ।

उत्तर : ____________________

30. रघुमहाराज: एतस्मिन् अध्वरे नि:शेषविश्राणितकोशजात: अभवत् —

(A) राजसूये
(B) सुदर्शने
(C) अश्वमेधे
(D) विश्वजिति ।

उत्तर : ____________________

31. एतस्य जन्मदिनम् शिक्षकदिनोत्सव: इति वयम् आचराम: —

(A) अम्बेड्करमहोदयस्य
(B) विश्वेश्वरय्यमहोदयस्य
(C) राधाकृष्णन्महोदयस्य
(D) जवाहरलालनेहरूमहोदयस्य ।

उत्तर : ____________________

32. यथाविधि - अव्ययीभाव:, वृकोदर: —

(A) बहुव्रीहि:
(B) कर्मधारय:
(C) द्वन्द्व:
(D) तत्पुरुष: ।

उत्तर : ____________________

33. 'अन्यच्च' — अस्य सन्धे: उदाहरणम् —

(A) सत्वसन्धे:
(B) श्चुत्वसन्धे:
(C) ष्टुत्वसन्धे:
(D) जश्त्वसन्धे: ।

उत्तर : ____________________

34. कुलं एतेन रक्ष्यते —

(A) विद्यया
(B) सत्येन
(C) मृजया
(D) वृत्तेन ।

उत्तर : ____________________

35. 'मर्यादापुरुषोत्तम:' इति प्रथित: एष: —

(A) श्रीराम:
(B) श्रीकृष्ण:
(C) दशरथ:
(D) दिलीप: ।

उत्तर : ____________________

36. वेदानां सारभूतो भाग: एष: —

(A) उपनिषत्
(B) संहिता
(C) आरण्यकम्
(D) ब्रह्मसूत्राणि ।

उत्तर : ____________________

37. एतत् तथैव तिष्ठति —

(A) धनम्
(B) हुतम्
(C) जलम्
(D) ज्ञानम् ।

उत्तर : ____________________

38. 'निर्विघ्नम्' अस्य विग्रहवाक्यरूपं एवं भवति —

(A) नि: विघ्नम्
(B) विघ्नम् न
(C) विघ्नस्य अभाव:
(D) न विघ्नम् ।

उत्तर : ____________________

39. "हितभुक्, मितभुक्, ऋतुभुक्, अरुक् भवति" इति एष: उत्तरं ददौ —

(A) वाग्भट:
(B) चरक:
(C) सुश्रुत:
(D) धन्वन्तरि: ।

उत्तर : ____________________

40. छन्दसा निबद्धं काव्यं इदं भवति —

(A) गद्यम्
(B) पद्यम्
(C) चम्पू
(D) साहित्यम् ।

उत्तर : ____________________

41. पठ् धातो: लोट् प्रथमपुरुष बहुवचनरूपम् इदं भवति —

(A) पठतु
(B) पठन्तु
(C) पठ
(D) पठाम ।

उत्तर : ____________________

42. "शरीरमाद्यं खलु धर्मसाधनम्" इति एष: अवदत् —

(A) भारवि:
(B) माघ:
(C) कालिदास:
(D) श्रीहर्ष: ।

उत्तर : ____________________

43. 'तावदृष्ट्वा' — अस्य पदस्य विभजनरूपम् इदम् —

(A) तावत् +अदृष्ट्वा (B) तावद् + दृष्ट्वा

(C) तौ + अदृष्ट्वा (D) ताव् + अदृष्ट्वा ।

उत्तर : ______________________________

44. 'भवान्' शब्दस्य अन्यलिङ्गरूपम् इदं भवति —

(A) भवती (B) भवति

(C) भवानी (D) भवन्तः ।

उत्तर : ______________________________

45. 'अवनिः' अस्य समानार्थकपदम् इदम् —

(A) अटवी (B) अरण्यम्

(C) काननम् (D) भूमिः ।

उत्तर : ______________________________

46. 'परिसरपूता' — अस्य विग्रहवाक्यम् एवं भवति —

(A) परिसरस्य पूता (B) परिसरं पूता

(C) परिसरेण पूता (D) परिसरात् पूता ।

उत्तर : ______________________________

47. मनसि, पठसि, लिखसि, गच्छसि–एतेषु समूहेतरपदम् इदम् भवति —

(A) गच्छसि (B) लिखसि

(C) पठसि (D) मनसि ।

उत्तर : ______________________________

48. 'यथा' अस्य नित्यसम्बन्धि शब्दः एषः —

(A) यत्र (B) तत्र

(C) तथा (D) तदा ।

उत्तर : ______________________________

49. योगः विद्यां रक्षति । एतद्वाक्यस्य कर्मणिरूपं एवं भवति —

(A) योगः विद्यया रक्ष्यते (B) योगेन विद्यां रक्ष्यते

(C) योगेन विद्या रक्षति (D) योगेन विद्या रक्ष्यते ।

उत्तर : ______________________________

50. मधुराविजयस्य प्रधानरसः एषः —

(A) शान्तः (B) करुणः

(C) भयानकः (D) वीरः ।

उत्तर : ______________________________

## PART - B

लघूत्तराणि लिखत — 4 ∞ 2 = 8

51. विद्याधनं सर्वधनप्रधानमिति कथं निरुप्यते ?

52. अध्ययनानन्तरं राधाकृष्णन् कुत्र-कुत्र प्राध्यापकवृत्तिम् अकरोत् ?

53. रामायणे मानसं सरः कथं वर्णितमस्ति ?

54. खलसज्जनानां मैत्रीं विवृणुत ।

**अथवा**

केभ्यः प्रभवन्ति रोगाः ?

कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत — 2

55. अहं पत्रं विलिख्य मित्राय प्रेषयामि ।

प्रयोगं परिवर्तयत — 2

56. पुत्रैः जनकः सेव्यते ।

यथानिर्देशम् उत्तरं लिखत — 4 ∞ 3 = 12

57. एषः कवीनां पोषकः आसीत् ।
क: पाठ: ?
क: कवीनां पोषक: आसीत् ?
तस्य वंश: क: ?

**अथवा**

द्विगुणमुपपादय देवतासु पूजाम् ।
क: पाठ: ?
क: अवदत् ?
काम् अवदत् ?

58. मया तस्य कृते किं कृतं इति पृच्छ ?
क: पाठ: ?
क: अवदत् ?
कम् अवदत् ?

59. भो वैदेशिका: ! किमेवमुच्यते ?
क: पाठ: ?
क: अवदत् ?
काम् अवदत् ?

60. शरद्घनं नार्दति चातकोऽपि ।
क: पाठ: ?
क: अवदत् ?
कम् अवदत् ?

कव्यो: देशकालकृतिनां विषये लिखत — $2 \infty 3 = 6$

61. वेदव्यास:

62. भास:

श्लोकद्वयस्य तात्पर्यं कर्णाटकभाषया आंग्लभाषया संस्कृतभाषया वा लिखत — $2 \infty 3 = 6$

63. इन्द्रियाणि हयानाहु:
विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिण: ॥

[ Turn over

64. अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः ।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥

**अथवा**

गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति पण्डिताः ।
चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः ॥

दशवाक्यपरिमितम् उत्तरं कर्णाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा लिखत — 3 ∞ 3 = 9

65. रघोः औदार्यम् वर्णयत ।

66. तारापीडः शोकतप्तां विलासवतीं कथं सान्त्वयामास ?

67. वराहमिहिरस्य कृतीनां विषये लिखत ।

**अथवा**

प्राचीनकालस्य ग्रन्थालयविषये लिखत ।

68. अत्रत्यं विद्यमानम् अलङ्कारं विवृणुत — 3

रामरावणयोर्युद्धं रामरावणयोरिव ।

69. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत — 3

सकलभुवनभारः स्थापितो वत्समूर्ध्नि ।

70. कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत — 3

मूर्खाः वीथीषु वृथा अटिष्यन्ति । चतुरच्छात्राः गृहे एव स्थित्वा पठिष्यन्ति । अतः ते उन्नतश्रेणीं लप्स्यन्ते । तस्मात् सर्वे प्राज्ञाः भवन्तु ।

71. संस्कृतभाषया अनुवादं कुरुत — 3

ಹಸು ಹುಲ್ಲನ್ನು ತಿನ್ನುತ್ತದೆ. ನದಿ ನೀರನ್ನು ಕುಡಿಯುತ್ತದೆ. ಆದರೂ ಸಿಹಿಯಾದ ಹಾಲನ್ನು ಕೊಡುತ್ತದೆ. ಆದ್ದರಿಂದ ಹಸು ನಮಗೆ ಬಹಳ ಉಪಕಾರಿ.

Cow eats grass. It drinks water from the rivers. Even then it gives sweet milk. Therefore cow is very useful to us.

श्लोकौ पूरयत — 2 ∞ 4 = 8

72. नानाभाषि ............................................................

.......................................................................... ।

..............................................................................

............................................................ जननीयम् ॥

73. दानेन ..........................................................

...................................................................... ।

......................................................................

.......................................................... नान्यत् ॥

74. कल्याणनगरीवासवीप्रौढशालायाः राजेशः / रोहिणी इति मत्वा कक्ष्याध्यापकं प्रति विरामपत्रं लिखत । 5

**अथवा**

पितरं प्रति अध्ययनविषये पत्रं लिखत ।

75. प्रबन्धम् एकं लिखत — 5

गणराज्योत्सव:

**अथवा**

स्त्रीशिक्षणम् ।